नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. Of Questions- 27

# P–95–Sanskrit (V)

No. of Printed Pages- 07

# प्रवेशिका परीक्षा, 2016

# संस्कृतविशेषः

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः।

(2) सर्वे प्रश्नाः अनिवार्याः।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः।

प्र.1 ''जशशसोः शि'' ''यस्येति च'' इति सूत्रयोः एकस्यार्थो लेख्यः (1)

प्र.2 निर्देशानुसारं रूपाणि लिखत– $\left(\frac{3}{4}+\frac{3}{4}=1\frac{1}{2}\right)$

(अ) बालक शब्दस्य षष्ठी विभक्तेः

(ब) गुरू शब्दस्य पञ्चमी विभक्तेः।

प्र.3 निम्नपदयोः मूलशब्दं विभक्तिं वचनं च लिखत – $\left(\frac{3}{4}+\frac{3}{4}=1\frac{1}{2}\right)$

(अ) रामाणाम्

(ब) हरिम्।

प्र.4 निर्देशानुसारं धातुरूपाणि लिखत – $\left(\frac{3}{4}+\frac{3}{4}=1\frac{1}{2}\right)$

(अ) 'तुद्' धातोः लट् लकारे मध्यम पुरुषस्य

(ब) 'गम्' धातोः लृट् लकारे प्रथम पुरुषस्य।

प्र.5 निम्नलिखितपदयोः लकारं पुरुषं वचनं च लिखत – $\left(\frac{3}{4}+\frac{3}{4}=1\frac{1}{2}\right)$

(अ) नयामि

(ब) दास्यन्ति।

प्र.6 अधोलिखितयोः वाक्ययोः वाच्यं परिवर्तनं कृत्वा लिखत। (1+1=2)

(अ) मया पाठः स्मर्यते।

(ब) मोहनः ग्रामं गच्छति।

प्र.7 ''अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'' इति सूत्रस्यार्थं लिखत। (2)

प्र.8 अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः अर्थो लेख्यः (1+1=2)

(अ) आङि चाऽऽपः

(ब) न तिसृचतसृ

(स) ऋन्नेभ्यो ङीप्।

प्र.9 सम्बोधने का विभक्ति भवति? (2)

प्र.10 ''अव्ययीभावश्च'' इति सूत्रस्यार्थो लेख्यः। (2)

प्र.11 अधोलिखितेषु केषाञ्चन त्रयाणाम् अर्थं लिखित्वा संस्कृतवाक्येषु प्रयोगं कुरूत। (1+1+1=3)

(i) दिवा

(ii) पुरा

(iii) नाना

(iv) प्रातः

(v) सहसा

प्र.12 ''अधिशीङ्स्थासां कर्म'' ''चतुर्थी सम्प्रदाने'' इत्यनयोः सूत्रयोः सोदाहरणम् अर्थो लेख्यः। $\left(1\frac{1}{2}+1\frac{1}{2}=3\right)$

प्र.13 निम्नाङ्कितेषु छन्दःसु कयोश्चित् द्वयोः लक्षणोदाहरणानि लेख्यानि – $\left(1\frac{1}{2}+1\frac{1}{2}=3\right)$

(अ) मन्दाक्रान्ता

(ब) स्त्रग्धरा

(स) बसन्ततिलका

प्र.14 अधोलिखितेषु द्वयोः अलङ्कारयोः लक्षणोदाहरणे लिखत – $\left(1\frac{1}{2}+1\frac{1}{2}=3\right)$

(अ) रूपकम्

(ब) प्रतिवस्तूपमा

(स) परिकरः

प्र.15 निम्नलिखितशब्दानां पर्यायत्रयं लिखत। (प्रत्येकस्य) (1+1+1+1=4)

(i) कर्णः

(ii) पुत्री

(iii) शरीरः

(iv) पादः

प्र.16 अधोलिखितेषु प्रश्नेषु यथेच्छं चत्वारः प्रश्नाः समाधेयाः – (1+1+1+1=4)

(i) हिरण्यवक्षाः का अस्ति?

(ii) कः विश्वबन्धुत्व उद्घोषयत्?

(iii) सतां किं लक्षणम्?

(iv) मरुस्थले स्फुटं किं भाति?

(v) सन्धि पत्रं कस्य करे दृष्टम्?

(vi) धवलकेतुः रमेशः कः अस्ति?

प्र.17 अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्चः प्रश्नाः समाधेयाः– (1+1+1+1+1=5)

(i) ''कथमहं सेवानभिज्ञः'' इति वाक्यं कोऽब्रवीत?

(ii) कीदृशाः भृत्याः कर्तव्याः?

(iii) दुर्दान्तनाम सिंहः कुत्र बसति स्म?

(iv) ब्रह्मपुराख्यं नगरं कुत्रास्ति?

(v) कस्य राज्यं नश्यति?

(vi) वृद्धशशकः किम् अचिन्तयत्?

(vii) दमनकः संजीवकविषये सिहं किम् अकथयत्?

प्र.18 अधोलिखतयोः कथयोः एकस्याः सारांशं स्वसंस्कृते हिन्द्यां वा लेख्यः। (2)

(i) कराल कुट्टिनी कथा

(ii) बुद्धि माहात्म्यम् कथा।

प्र.19 अधोलिखितेषु प्रयोगेषु द्वयोः ससूत्रं सिद्धिः कार्या – $\left(2\frac{1}{2}+2\frac{1}{2}=5\right)$

रामाभ्याम्, सर्वस्मै, निर्जरसौ, त्रिषु, गावः।

प्र.20 अधोलिखितेषु प्रयोगेषु द्वयोः ससूत्रं सिद्धिः कार्या – $\left(2\frac{1}{2}+2\frac{1}{2}=5\right)$

रमाभ्यः, स्त्रिया, गौरी, उत्तरपूर्वस्यै, सर्वस्याः।

प्र.21 अधोलिखितेषु प्रयोगेषु द्वयोः ससूत्रं सिद्धिः कार्या – $\left(2\frac{1}{2}+2\frac{1}{2}=5\right)$

ज्ञानानि कतरे, वारिणे, मधु प्रद्युना।

प्र.22 अधोलिखितोदाहरणेषु केषाञ्चन पञ्च प्रयोगाणां ससूत्रं विभक्तिं निर्दिशत – (1+1+1+1+1=5)

(i) हरिं भजति

(ii) बलिं याचते वसुधाम्

(iii) पुत्रेण सहागतः पिता

(iv) स्थाल्यां पचति

(v) गवां गोषु वा कृष्णा बहुक्षीरा

(vi) सतां गतम्

(vii) धावतोऽश्वात् पतति।

प्र.23 अधोलिखितगद्ययोः कस्यचिदेकस्य सप्रसङ्ग व्याख्या कार्या – (3)

स चार्थः पुरुषाणां षड्भिरुपायैर्भवति। भिक्षया, नृपसेवया, कृषिकर्मणा, विद्योपार्जनेन, व्यहारेण, वाणिक्र कर्मणा वा। सर्वेषामपि तेषां वाणिज्येनाऽतिरस्कृतोऽर्थलाभः स्यात्।

**अथवा**

कस्मिंश्चित् तरौ वायसदम्पती निवसतः। तयोश्चाऽपत्यानि तत्कोटराऽवस्थितेन केनापि कृष्णसर्पेण खादितानि। ततः पुनः गर्भवती वायसी वायसमाह–नाथ। त्यक्तव्योऽद्यैव अयं तरुः।

प्र.24 कस्याप्येकस्य श्लोकस्य सप्रसङ्गान्वयपूर्वकं व्याख्या कार्या – (3)

(i) पिबन्ति नद्यः स्वयमेव नाम्भः

स्वयं न खादन्ति फलानि वृक्षाः।

धाराधरो वर्षति नात्महेतोः

परोपकराय सतां विभूतयः।।

**अथवा**

(ii) कनकमुकुटधारी पापहारी सुहारी,

जनहृदयबिहारी भैरवारिर्भवारिः।

असुरकुलनियन्ता साधु सन्तापहारी,

जयति जयति मैनादिव्यसुनुर्मुरारिः।।

प्र.25 अधोलिखित पद्ययोः कस्यचिदेकस्य सप्रसङ्गान्वय भावार्थो लेख्यः – (3)

(i) स शीतलो गन्धवहः समीरः

स तित्तिराणां मधुरो विरावः।

तन्नर्तनं बर्ह–विभूषणानां

समुत्प्लुतिः सा च कुरंगमाणाम्।।

**अथवा**

(ii) बुधा विहायाऽन्यानतो भवद्यशो गायन्ति।

उदिते चन्द्रे नहि जनास्तारागणं भजन्ति।।

प्र.26 कमप्येकं विषयमवलम्ब्य शतपदेषु संस्कृते निबन्धं लिखत– (4)

(i) संस्कृत दिवसः

(ii) अस्माकं विद्यालयः।

प्र.27 भवान् 'अंकितः', राजकीय प्रवेशिका संस्कृत विद्यालय–विद्यानगरस्थ प्रधानाध्यापकाय दिनद्वयस्य अवकाशाय प्रार्थनापत्रं लिखत। (3)

**अथवा**

भवान् 'पीयूषः' संस्कृत सम्भाषणशिविरं गन्तुम् इच्छति, एतदर्थ स्वजनकाय पत्रं लिखतु।

————————

DO NOT WRITE ANYTHING HERE